# A-I/1/2302/21

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. बौद्धाः कति प्रमाणानि स्वीकुर्वन्ति? नामानि लिखत।
2. लिङ्गस्य त्रिरूपत्वं लिखत।
3. बौद्धतर्कभाषाकारः कः? केन विहारेण सम्बद्धोऽयं आचार्यः?
4. अनुमानशब्दस्य का व्युत्पत्तिः?

**अथवा**

बौद्धतर्कभाषायाः तृतीयपरिच्छेदस्य नाम किम्?

5. असपक्षः कः? उदाहरणमेकं लिखत।
6. परार्थानुमानं कतिविधम्? स्वाधीतग्रन्थदिशा लिखत।
7. न्यायबिन्दुकारः कः? तस्य समयं लिखत।
8. 'तर्कभाषा' नाम्ना कति ग्रन्थाः उपलभ्यन्ते? कर्तुः नाम लिखत।
9. 'वृक्षोऽयं शिंशपात्वात्' इत्यनुमाने कः साध्यः? कश्च पक्षः?

**अथवा**

कारणस्याभावे कार्योत्पत्तिः भवति न वा? ग्रन्थदिशा सूचयत।

10. सामान्यलक्षणं कस्य प्रमाणस्य विषयः?

**अथवा**

'संस्कृतं क्षणिकं सर्वम्' इति सत्यमसत्यं वा?

11. प्रमेयानि कति? अधीतग्रन्थदिशा नामानि लिखत।
12. अनुमानप्रमाणं कतिविधम्? नामानि लिखत।

13. बौद्धतर्कभाषायां कति परिच्छेदाः? क्रमानुसारं लिखत।

**अथवा**

पक्षः कः? उदाहरणमेकं लिखत।

14. स्वार्थानुमानस्य लक्षणं लिखत।

15. अनुपलब्धेः उदाहरणमेकं लिखत।

**अथवा**

व्याप्तेः लक्षणं किम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. त्रिविधहेतुः लक्षणपुरस्सरं प्रतिपादयत।

17. अधीतग्रन्थदिशा दृष्टान्तदोषाः प्रतिपादनीया।

**अथवा**

लिङ्गस्य त्रिरूपत्वं त्रिरूपप्रयोजनं च लिखत।

18. बौद्धानुमानप्रमाणस्य भेदान् विलिख्य परार्थानुमानं व्याख्येयम्।

**अथवा**

अपोहनिरूपणं बौद्धनयने क्रियताम्।

19. स्वार्थानुमानम् अधीतग्रन्थनयेन व्याख्येयम्।

**अथवा**

प्रत्यक्षप्रमाणस्य लक्षणं विलिख्य भेदान् लिखत।

20. ईश्वरवादस्य निरसनम् अधीतग्रन्थनयेन प्रतिपादनीयम्।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. बौद्धतर्कभाषाकारस्य व्यक्तित्वं कृतित्वं चाभिलक्ष्य निबन्धमेकं लिखत।

**अथवा**

पाठ्यग्रन्थस्य पाठ्यांशस्य सारं सम्यक्तया उपनिबद्धीकुरुत।

# A-I/2/2303/21

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'अभिधर्म' पदस्य कोऽर्थः?
2. 'चतुर्ष्वर्थेषु पञ्चानामाधिपत्यम्' इत्यस्य कोऽभिप्रायः?
3. अभिधर्मकोशस्य द्वितीयकोशस्थानस्य नाम किम्?
4. 'संक्लेशव्यवदानयोः' इत्यत्र संक्लेशपदस्य कोऽभिप्रायः?
5. पञ्च स्कन्धान् लिखत।
6. 'चित्ताश्रयस्तद्विकल्पः' इत्यत्र चित्ताश्रयः कः?

**अथवा**

वेदना कतिधा? पाठ्यग्रन्थदिशा लिखत।

7. अभिधर्मकोशकारस्य अपरः ग्रन्थः कः?
8. कति इन्द्रियाणि? नामानि लिखत।
9. 'अमलं त्रयम्' इत्यस्य कोऽभिप्रायः?

**अथवा**

कति कुशलानि? नामानि लिखत।

10. अभिधर्मकोशग्रन्थोऽयं कस्य बौद्धप्रस्थानस्य समर्थकः?
11. माराः कति? नामानि लिखत।
12. 'विपाको जीवितं' इत्यत्र 'विपाक' पदस्य कोऽभिप्रायः?

**अथवा**

'नवाप्तिरन्त्यफलयोः' इत्यस्य कोऽभिप्रायः?

13. अभिधर्मकोशस्य प्रतिज्ञावचनं लिखत।

**अथवा**

'द्वेधा द्वादश' इत्यस्य कोऽभिप्रायः ?

14. 'बालस्तथारूप्ये' इत्यत्र 'बाल' पदस्य कोऽभिप्रायः ?

15. अभिधर्मकोशस्य कति कोशस्थानानि ? तेषां नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।**

16. स्वस्मृत्या पाठ्यग्रन्थस्य कारिकामेकां विलिख्य स्वसंस्कृतगिरा व्याख्यात। यात्र प्रश्नपत्रे नोल्लिखिता स्यात्।

17. सप्रसङ्गं व्याख्येयम् –

चतुर्ष्वर्थेषु पञ्चानामाधिपत्यं द्वयोः किल।

चतुर्णां पञ्चकाष्टानां संक्लेशव्यवदानयोः॥

**अथवा**

सर्वाल्पैर्निःशुभोऽष्टाभिर्विन्मनः कायजीवितैः।

युक्तो बालस्तथारूप्ये उपेक्षायुर्मनः शुभैः॥

18. यथाग्रन्थं विवेचयत –

दुःखेन्द्रियमसाता या कायिकी वेदना सुखम्।

साता ध्याने तृतीये तृतीये तु चैतसी सा सुखेन्द्रियम्॥

**अथवा**

सभागता सत्त्वसाम्यमासंज्ञिकमसंज्ञिषु।

निरोधश्चित्तचैत्तानां विपाकस्ते बृहत्फलाः॥

19. प्रसङ्गपूर्वकं व्याख्यात –

बोधिलभ्या मुनेर्न प्राक् चतुस्त्रिंशत्क्षणाप्तितः।

कामरूपाश्रये तूभे निरोधाख्यादितो नृषु॥

**अथवा**

विपाकोऽव्याकृतो धर्मः सत्त्वाख्यो व्याकृतोद्भवः।

निष्यन्दो हेतुसदृशो विसंयोगः क्षयो धिया॥

20. व्याख्यात –

चित्ताश्रयस्तद्विकल्पः स्थितिः संक्लेश एव च।

सम्भारो व्यवदानं च यावता तावदिन्द्रियम्॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. अभिधर्मकोशकारस्य व्यक्तित्वं कृतित्वं चाभिलक्ष्य निबन्धमेकं लिखत।

**अथवा**

पाठ्यग्रन्थस्य द्वितीयकोशस्थानस्य सारमधिकृत्य निबन्धमेकं लिखत।

# A-I/3/2304/21

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. विज्ञप्तिमात्रतासिद्धिग्रन्थकर्ता कः? कस्य सम्प्रदायस्य अयं ग्रन्थः?

2. त्रिंशिकाविज्ञप्तिमात्रतायां कति कारिकाः सन्ति?

3. विज्ञप्तिमात्रतासिद्धिप्रकरणं कति खण्डेषु विभक्तम्?

4. विज्ञानपरिणामः कतिविधः? नामानि लिखत।

**अथवा**

विज्ञप्तिमात्रतायाः ज्ञानं के कर्तुं क्षमाः? सूचयत।

5. विज्ञानस्य तृतीयपरिणामः कतिविधः? नामानि लिखत।

**अथवा**

विज्ञानस्य अपरपर्यायाः के? लिखत।

6. आयतनानि कति? नामानि लिखत।

7. धर्मोपचारः कः?

8. विज्ञानवादिमते प्रत्यक्षस्य सिद्धिः परमार्थतो जायते न वा?

**अथवा**

क्लेशाः कति? लिखत।

9. वेदना कतिविधा? नामानि लिखत।

10. योगाचारदर्शनस्य प्रवर्तकाचार्यः कः?

11. धर्मनैरात्म्यं किम्?

**अथवा**

आलयविज्ञानस्य चैतसिकाः कति? नामानि लिखत।

12. सिद्धः कः?

13. 'विज्ञप्तिमात्रतासिद्धिः' इत्यत्र 'विज्ञप्तिः' इत्यस्य पदस्य कोऽर्थः?

14. नैरात्म्यं कतिविधम्? नामानि लिखत।

**अथवा**

विक्षेपः कः? लिखत।

15. चित्तस्य पर्यायान् लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः। (5×6=30)**

16. स्वस्मृत्या पाठ्यग्रन्थस्य कारिकामेकां विलिख्य तस्याः विवृतिं कुरुत। या अत्र प्रश्नपत्रे नागता स्यात्।

17. सप्रसङ्गं व्याख्या विधेया –

त्रिविधस्य स्वभावस्य त्रिविधां निःस्वभावताम्।

संधाय सर्वधर्माणां देशिता निःस्वभावता॥

**अथवा**

असंविदितकोपादिस्थानविज्ञप्तिं च तत्।

सदा स्पर्शमनस्कारवित् संज्ञाचेतनान्वितम्॥

18. यथाग्रन्थं विवेचयत –

धर्माणां परमार्थश्च स यतस्तथतापिसः।

सर्वकालं तथाभावात् सैव विज्ञप्तिमात्रता॥

**अथवा**

मनोविज्ञानसम्भूतिः सर्वदा संज्ञिकादृते।

समापत्तिद्वयान्मद्धान्मूर्छानादप्यचित्तकात्॥

19. आलयविज्ञानस्य वैशिष्ट्यं लिखत।

20. आश्रयपरावृत्तिः त्रिंशिकाप्रकरणनयेन लेखनीया।

**अथवा**

योगाचारदर्शनस्य वैशिष्ट्यं लिखत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. त्रिंशिकायाः प्रतिपाद्यविषयमधिकृत्य निबन्धमेकं लिखत।

**अथवा**

विज्ञप्तिमात्रतासिद्धिकारस्य व्यक्तित्वं कृतित्वं चाभिलक्ष्य दर्शनक्षेत्रे तस्यावदनं सम्यक्तया प्रतिपाद्यताम्।

**अथवा**

विज्ञानवादं युक्तिपूर्वकं विशदीकुरुत।

# A-I/4/2305/21

## चतुर्थसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. महापुरुषलक्षणानि कति ?
2. 'मिलिन्दपञ्ह' शब्दस्य कोऽर्थ: ?
3. आयतनानि कति ? नामोल्लेखं कुरुत।

**अथवा**

प्रज्ञा का ?

4. कस्य अश्रु भैषज्यं कस्य न भैषज्यम् ? पाठ्यग्रन्थदिशा लिखत।
5. भवनिरोध: कथं जायते ?
6. कतरं नु खो बहुतरं पुञ्ञं वा अपुञ्ञं वा ?

**अथवा**

का लक्खणा चेतना ?

7. परमं सुखं किम् ? पाठ्यग्रन्थदिशा सूचयत।
8. य: धर्मं पश्यति, स: कं पश्यति ? पाठ्यग्रन्थदिशा लिखत।
9. स्मृति: का ?

**अथवा**

कस्य निरोधाद् भवनिरोध: भवति ?

10. भदन्तनागसेन: क: ?
11. कस्य निरोधाद् भवनिरोध: ? पाठ्यग्रन्थदिशा सूचयत।
12. केन कारणेन मनुस्सान सव्वे समका ति ?

**अथवा**

को पटिसन्दहतीति ? पाठ्यग्रन्थदिशा सूचयत।

13. कथं बुद्धो अनुत्तरो ति?

14. मिलिन्दपञ्हग्रन्थस्य तृतीयप्रकरणस्य नाम किम्?

15. केन कारणेन समुद्दो लोणरसो ति?

**अथवा**

को भगवन्तं पस्सति?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कथं बुद्धो अनुत्तरो ति? वर्णयत।

17. यो न लभति निब्बानं, जानाति सो 'सुखं निब्बानं' ति? कथं? पाठ्यग्रन्थदिशा सूचयत।

18. कथं आत्मा न सङ्कमति पटिसन्दहति च? पाठ्यग्रन्थदिशा सूचयत।

**अथवा**

अनुपिटकवाङ्मयस्य परिचयो देयः।

19. नागसेनस्य वैदुष्यं कीदृशम्? विवृणुत।

**अथवा**

निरोधनिर्वाणप्रश्नान् लिखत।

20. भगवतो बुद्धस्य उपसम्पदाविषयकान् प्रश्नोत्तरान् लिखत।

**अथवा**

अधीतग्रन्थदिशा कर्मफलवादं विवृणुत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. पाठ्यग्रन्थस्य पाठ्यांशस्य वा सारः प्रतिपादनीयः।

**अथवा**

थेरवादस्य वैशिष्ट्यं लेखनीयम्।

**अथवा**

द्वात्रिंशन्महापुरुषलक्षणानि लेखनीयानि।